श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्रीकरुणाकराचार्य विरचितम्

# ॥ श्रीकरुणाञ्जनेयनवकम् ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीकरुणाञ्जनेयनवकम् ॥

नित्यापराधकलुषं करुणाञ्जनेय !
    नीरन्ध्रपापचरितं परहिंसयाऽर्द्रम्।
व्याघ्रं स्थितं कमपि तं मयि हन्तुमद्य
    व्याघ्रान्तकेश ! भगवन् ! भज सुप्रभातम्॥ १ ॥

आरादयं गिरिरसौ रघुवीर एव
    तस्योरसि व्रततिसन्ततिरेव सीता।
पन्थास्तमाप्तुमहमेव तवेति वक्ता
    संसारकानन इवासि दयाञ्जनेय !॥ २ ॥

सव्याधिरस्मि सततं करुणाञ्जनेय !
    को वाऽगदं मम भिषग् क्षममत्र दद्यात्।
इत्यातुरस्य पुरतो मम दर्शयन्स्त्वं
    हस्तस्थमौषधगिरिं किमु भासि देव !॥ ३ ॥

भर्तुः प्रेममयात् स्वकीयदुरितान्नीता पुरा रक्षसा
    त्वय्येव स्वयमाञ्जनेय ! करुणां कुर्या इति प्रार्थनाम्।
कृत्वा लब्धवती स्वकीयदयितुः योगं पुरा जानकी
    शार्दूलान्तकपूः प्रभो ! चरणयोर्न्यस्तोऽस्मि तेऽहं ततः॥ ४ ॥

भूजान्वेषक ! काननाश्रय ! महारत्नाकराराधित !
    सूर्योद्भूतरत ! प्रमाणित ! बुधैः वृत्तान्तविद्यानयैः।
अद्वैतं भजता त्वयैवमनघ ! व्याघ्रान्तकेशप्रभो !
    नेत्रा नः करुणाकरेण कलिता नेत्रेऽस्तु मूर्तिस्तव॥ ५ ॥

पूर्वं वज्रमिहाऽपतन्मम शिशोरित्यञ्जनावेक्षितां
    भासा च स्वगुरुं गिलेदिति पुनः प्रीत्येक्षितां छायया।

www.prapatti.com

आपद्बन्धुरसौ बभूव च ममेत्यालोकितां सीतया
शार्दूलान्तकमार्गकोणदलिते मूर्तिं श्रये प्रस्तरे॥ ६ ॥

भवे दुरितदूषिते भयनिदानसंवर्धके
मराविव मधूदकं मलयमारुतावीजितम्।
कपिं मनसि कुर्वतां कमपि पुण्डरीकान्तके
कपित्वमतिदूषितं व्रजति दूरतो मानसात्॥ ७ ॥

धृतभूधर ! हे ! करुणाहनुमन् !
पदयोरनिशं प्रणतोऽस्मि तव।
मतिमावह मानुषयोग्यगुणां
मयि सर्वजनप्रणयेन शुभाम्॥ ८ ॥

श्रीरामदूत ! प्रणतोऽभियाचे
व्याघ्रान्तकेशश्रितवत्सल ! त्वाम्।
कालेन देशेन सदाऽभिरामां
तवेव वाचं च धियं ददेथाः॥ ९ ॥

करुणाकरबुधकलिता मूर्तिः
करुणाहनुमन् ! तव भातु सदा।
करुणाकरशिशुकविता तव
सत्करुणेव शुभा पठतां भवतात्॥ १० ॥

There is something wrong in the above stanza. Firstly, 1,2 and 3 lines have 12 syllables and the 4th line has 13 syllables. Secondly, it does not match any meter that adiyen knows of (Of course, adiyen could be wrong).

नवव्याकृतिमर्मज्ञव्याघ्रान्तककपीश्वरः।
स्वकीयनवकज्ञेषु करोति करुणां सदा॥ ११ ॥

॥ इति श्रीकरुणाञ्जनेयनवकं संपूर्णम्॥

www.prapatti.com